[१३४] साध्वसाधुप्रयोगे च सप्तमी [1]वक्तव्या । (म. भा. १.४५८)

साधुर्देवदत्तो मातरि । [2]असाधुः पितरि (म.भा. १.४५८) ।

[१३५] कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या । (म. भा. १.४५८)

ऋद्धेषु भुञ्जानेषु दरिद्रा आसते । ब्राह्मणेषु तरत्सु वृषला आसते ।

[१३६] अकारकार्हाणां चाकारकत्वे सप्तमी वक्तव्या । (म. भा. १.४५८)

दरिद्रेष्वासीनेषु ऋद्धा भुञ्जते । वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति ।

[१३७] तद्विपर्यासे च सप्तमी वक्तव्या । (म. भा. १.४५८)

ऋद्धेष्वासीनेषु दरिद्रा भुञ्जते । ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति ।

[१३८] निमितात् [3]कर्मसंयोगे सप्तमी वक्तव्या । (म. भा. १.४५८)

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
[4]केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ (म. भा. १.४५८)

## 6 यस्य च भावेन भावलक्षणम् । (३६/७३४)

सप्तमी इति वर्तते । भावः क्रिया । यस्य [5]च भावेन यस्य च क्रियया क्रियान्तरं लक्ष्यते, ततो भाववतः सप्तमी विभक्तिर्भवति । प्रसिद्धा च किया क्रियान्तरं लक्षयति । गोषु दुह्यमानासु गतः, दुग्धास्वागतः । अग्निषु हूयमानेषु गतः, हुतेष्वागतः (म.भा. १.४५९) । भावेन इति किम् ? यो जटाभिः स [6]भुङ्क्ते । पुनर्भावग्रहणं किम् ? यो भुङ्क्ते स देवदत्तः ॥

## षष्ठी चानादरे । (३८/६३५)

पूर्वेण सप्तम्यां प्राप्तायां [7]षष्ठी विधीयते, चकारात् साऽ[8]पि भवति । अनादराधिके भावलक्षणे भाववतः षष्ठीसप्तम्यौ विभक्ती भवतः । रुदतः प्राव्राजीत्, रुदति प्राव्राजीत् । क्रोशतः प्राव्राजीत्, क्रोशति प्राव्राजीत् । क्रोशन्तमनादृत्य [9]प्रव्रजितः इत्यर्थः ॥

---

1. वाच्या क. 2. उदाहरणमिदं नास्ति फ. 3. कर्मयोगे इ. 4. बालेषु ड. फ. ह. 5. च नास्ति क. 6. मुक्तः ड. 7. षष्ठी विभक्तिः, सप्तमी च विभक्तिर्भवति फ. ह. 8. च क. 9. प्राव्राजीत् ड. फ. ह.